



श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये



# श्री मुकुन्द माला

***shrI mukunda mAlA***

# श्री मुकुन्द माला

**श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी । वेदान्तचार्य वर्यो मे सन्निधत्तां सदा हृदि ॥**

घुष्यते यस्य नगरे रङ्गयात्रा दिने दिने।
तमहं शिरसा वन्दे राजानं कुलशेखरम्॥

श्रीवल्लभेति वरदेति दयापरेति - भक्तप्रियेति भव लुण्ठन कोविदेति।
नाथेति नागशयनेति जगन्निवासे - त्यालापिनं प्रतिपदं कुरु मे मुकुन्द ॥ [1]

जयतु जयतु देवो देवकीनन्दनोऽयं - जयतु जयतु कृष्णो वृष्णि वंश प्रदीपः।
जयतु जयतु मेघ श्यामलः कोमलाङ्गो - जयतु जयतु पृथ्वी भार नाशो मुकुन्दः ॥ [2]

मुकुन्द मूर्ध्ना प्रणिपत्य याचे - भवन्तं एकान्तं इयन्तं अर्थम्।
अविस्मृतिः त्वत् चरणारविन्दे - भवे भवे मेऽस्तु भवत्-प्रसादात् ॥ [3]

नाहं वन्दे तव चरणयोः द्वन्द्वं अद्वन्द्व हेतोः - कुम्भीपाकं गुरुमपि हरे नारकं नापिनेतुम्।
रम्या रामा मृदु तनुलता नन्दने नापि रन्तुं - भावे भावे हृदय भवने भावयेयं भवन्तम् ॥ [4]

नास्था धर्मे न वसुनिचये नैव कामोप भोगे - यद्-यद् भव्यं भवतु भगवन् पूर्व कर्मानुरूपम्।
एतत् प्रार्थ्यं मम बहुमतं जन्म जन्मान्तरेऽपि - त्वत् पादाम्भोरुह-युग-गता निश्चला भक्तिरस्तु ॥ [5]

दिवि वा भुवि वा ममास्तु वासो - नरके वा नरकान्तक प्रकामम्।
अवधीरित शारदारविन्दौ - चरणौ ते मरणेऽपि चिन्तयामि ॥ [6]

कृष्ण त्वदीय पदपङ्कज पञ्जरान्तं - अद्यैव मे विशतु मानस राजहंसः।
प्राण प्रयाण समये कफ-वात-पित्तैः - कण्ठ अवरोधन विधौ स्मरणं कुतस्ते ॥ [7]

चिन्तयामि हरिमेव सन्ततं - मन्द मन्द हसित अननाम्बुजम्।
नन्दगोप तनयं परात्परं - नारदादि मुनि बृन्द वन्दितम् ॥ [8]

# श्री मुकुन्द माला

कर चरन सरोजे कान्तिमन्नेत्र मीने - श्रम मुषि भुज वीचि व्याकुले अगाध मार्गे।

हरि सरसि विगाह्यापीय तेजो जलौघं - भव मरु परिखिन्नः खेदमद्य त्यजामि ॥ [9]

सरसिज नयने सषङ्ख चक्रे - मुरभिदि मा विरमस्व चित्त रन्तुम्।

सुख तरम् अपरं न जातु जाने - हरिचरण स्मरणामृतेन तुल्यम् ॥ [10]

माभीः मन्द मनो विचिन्त्य बहुधा यामीश्चिरं यातनाः

नामी नः प्रभवन्ति पाप-रिपवः स्वामी ननु श्रीधरः।

आलस्यं व्यपनीय भक्तिसुलभं ध्यायस्व नारायणं

लोकस्य व्यसन आपनोदन करो दासस्य किं न क्षमः ॥ [11]

भव जलधि गतानां द्वन्द्व वाताहतानां - सुत-दुहितृ कलत्र-त्राण भारार्दितानाम्।

विषम-विषय-तोये मज्जतां अप्लवानां - भवतु शरणमेको विष्णुपोतो नराणाम् ॥ [12]

भवजलधिं अगाधं दुस्तरं निस्तरेयं - कथमहमिति चेतो मास्मगाः कातरत्वम्।

सरसिज दृशि देवे तावकी भक्तिरेका - नरकभिदि निषण्णा तारयिष्यति अवष्यम् ॥ [13]

तृष्णातोये मदन पवन उद्धूत मोह ऊर्मिमाले - दारावर्ते तनय सहज ग्राह संघाकुले च।

संसाराख्ये महति जलधौ मज्जतां नः त्रिधामन् - पादाम्भोजे वरद भवतो भक्तिनावं प्रयच्छ ॥ [14]

माद्राक्षं क्षीण पुण्यान् क्षणमपि भवतो भक्तिहीनान् पदाब्जे

माश्रौषं श्राव्यबन्धं तव चरितमपास्य अन्यदाख्यान जातम्।

मास्मार्षं माधव त्वामपि भुवनपते चेतसा अपह्नुवानान्

माभूवं त्वत् सपर्या व्यतिकर रहितो जन्म जन्मान्तरेऽपि ॥ [15]

# श्री मुकुन्द माला

जिह्वे कीर्तय केशवं मुररिपुं चेतो भज श्रीधरं
पाणिद्वन्द्व समर्चयआच्युत कथाः श्रोत्रद्वय त्वं श्रुणु ।
कृष्णं लोकय लोचनद्वय हरेः गच्छाङ्घ्रि युग्मालयं
जिघ्र घ्राण मुकुन्दपाद तुलसीं मूर्धन् नम अधोक्षजम् ॥ [16]

हे लोकाश्श्रृणुत प्रसूति मरण व्याधेः चिकित्साम् इमां
योगज्ञाः समुदाहरन्ति मुनयो यां याज्ञवल्क्यादयः ।
अन्तर्ज्योतिः अमेयम् एकम् अमृतं कृष्णाख्यम् आपीयतां
तत्पीतं परमौषधं वितनुते निर्वाणम् आत्यन्तिकम् ॥ [17]

हे मर्त्याः परमं हितं श्रृणुत वो वक्ष्यामि संक्षेपतः
संसारार्णवम् आपदूर्मि बहुलं सम्यक् प्रविश्य स्थिताः ।
नानाज्ञानम् अपास्य चेतसि नमो नारायणाय इत्यमुं
मन्त्रं सप्रणवं प्रणाम सहितं प्रावर्तयध्वं मुहुः ॥ [18]

पृथ्वी रेणुरणुः पयांसि कणिकाः फल्गुस्फुलिङ्गोनलः
तेजो निःश्वसनं मरुत् तनुतरं रन्ध्रं सुसूक्ष्मं नभः ।
क्षुद्रा रुद्र पितामह प्रभृतयः कीटाः समस्तास्सुराः ।
दृष्टे यत्र स तावको विजयते भूमा अवधूतावधिः ॥ [19]

बद्धेन अञ्जलिना नतेन शिरसा गात्रैः सरोमोद्गमैः
कण्ठेन स्वर गद्-गदेन नयने नोद्गीर्ण् बाष्पाम्बुना ।
नित्यं त्वत् चरणारविन्दयुगल ध्यान अम्रुतास्वादिनाम्
अस्माकं सरसीरुहाक्ष सततं संपद्यतां जीवितम् ॥ [20]

हे गोपालक हे कृपाजलनिधे हे सिन्धुकन्यापते
हे कंसान्तक हे गजेन्द्र करुणापारीण हे माधव ।
हे रामानुज हे जगत्त्रय गुरो हे पुण्डरीकाक्ष मां
हे गोपीजननाथ पालय परं जानामि न त्वां विना ॥ [21]

भक्तापाय भुजङ्ग गारुडमणिः त्रैलोक्य रक्षामणिः
गोपीलोचन चातकाम्बुदमणिः सौन्दर्य मुद्रामणिः ।
यः कान्तामणि रुक्मिणी घनकुच द्वंद्वैक भूषामणिः
श्रेयो देवशिखामणिः दिशतु नो गोपालचूडामणिः ॥ [22]

शत्रुच्-छेदैक मन्त्रं सकलम्-उपनिषद् वाक्य-सम्पूज्य मन्त्रं
संसारोत्तार मन्त्रं समुपचित तमस्-सङ्घ निर्याण मन्त्रं ।
सर्व ऐश्वर्यैक मन्त्रं व्यसन-भुजग सन्दष्ठ सन्त्राण मन्त्रं
जिह्वे श्रीकृष्ण मन्त्रं जप जप सततं जन्म-साफल्य मन्त्रम् ॥ [23]

व्यामोह प्रशमौषधं मुनिमनोवृत्ति प्रवृत्त्यौषधं
दैत्येन्द्रार्ति करौषधं त्रिजगताम् सञ्जीवनैकौषधम् ।
भक्तात्यन्त हितौषधं भवभय प्रध्वंसनैकौषधं
श्रेयः प्राप्तिकरौषधं पिब मनस् श्रीकृष्ण दिव्यौषधम् ॥ [24]

आम्नाय अभ्यसनानि अरण्य-रुदितं वेदव्रतानि अन्वहं
मेदश्-छेद फलानि पूर्तविधयः सर्वे हुतं भस्मनि ।
तीर्थानाम् अवगाहनानि च गजस्नानं विना यत्पद
द्वन्द्वाम्भोरुह संस्मृतिः विजयते देवस्य नारायणः ॥ [25]

# श्री मुकुन्द माला

श्रीमन्नाम प्रोच्य नारायणाख्यं - के न प्रापुः वाञ्छितं पापिनोऽपि ।
हा नः पूर्वं वाक्प्रवृत्ता न तस्मिन् - तेन प्राप्तं गर्भवासादि दुःखम् ॥ [26]

मज्जन्मनः फलमिदं मधुकैटभारे - मत्प्रार्थनीय मदनुग्रह एष एव ।
त्वद्भृत्य भृत्य परिचारक भृत्य भृत्य - भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ [27]

नाथे नः पुरुषोत्तमे त्रिजगताम् एकाधिपे चेतसा
सेव्ये स्वस्य पदस्य दातरि सुरे नारायणे तिष्ठति ।
यं कञ्चित्-पुरुषाधमं कतिप-ग्रामेशम् अल्पार्थदं
सेवायै मृगयामहे नरमहो मूढा वराका वयम् ॥ [28]

मदन परिहर स्थितिं मदीये - मनसि मुकुन्द पदारविन्द-धाम्नि ।
हरनयन कृशानुना कृशोऽसि - स्मरसि न चक्र पराक्रमं मुरारेः ॥ [29]

तत्त्वं ब्रुवाणानि परं परस्मात् - मधु क्षरन्तीव सतां फलानि ।
प्रावर्तय प्राञ्जलिः अस्मि जिह्वे - नामानि नारायण गोचराणि ॥ [30]

इदं शरीरं परिणाम पेशलं - पतत्यवश्यं श्लथसन्धि जर्जरम् ।
किमौषधैः क्लिश्यसि मूढ दुर्मते - निरामयं कृष्ण रसायनं पिब ॥ [31]

दारा वाराकर वरसुता ते तनूजो विरिञ्चिः
स्तोता वेदस्तव सुरगणो भृत्यवर्गः प्रसादः ।
मुक्तिर्माया जगदविकलं तावकी देवकी ते
माता मित्रं वलरिपु सुतः त्वयि अतः अन्यन्न जाने ॥ [32]

# श्री मुकुन्द माला

कृष्णो रक्षतु नो जगत्-त्रयगुरुः कृष्णं नमस्याम्यहं
कृष्णेन अमरशत्रवो विनिहताः कृष्णाय तस्मै नमः ।
कृष्णादेव समुत्थितं जगदिदं कृष्णस्य दासोऽस्म्यहं
कृष्णे तिष्ठति सर्वमेतत् अखिलं हे कृष्ण रक्षस्व माम् ॥ [33]

तत्त्वं प्रसीद भगवन् कुरु मय्यनाथे - विष्णो कृपां परम कारुणिकः किल त्वम् ।
संसार सागर निमग्नम् अनन्त दीनं - उद्धर्तुम् अर्हसि हरे पुरुषोत्तमोऽसि ॥ [34]

नमामि नारायण पादपङ्कजं - करोमि नारायण पूजनं सदा ।
वदामि नारायण नाम निर्मलं - स्मरामि नारायण तत्त्वमव्ययम् ॥ [35]

श्रीनाथ नारायण वासुदेव - श्रीकृष्ण भक्त प्रिय चक्रपाणे ।
श्रीपद्मनाभाच्युत कैटभारे - श्रीराम् पद्माक्ष हरे मुरारे ॥ [36]

अनन्त वैकुण्ठ मुकुन्द कृष्ण - गोविन्द दामोदर माधवेति ।
वक्तुं समर्थोऽपि न वक्ति कश्चित् - अहो जनानां व्यसनाभिमुख्यम् ॥ [37]

ध्यायन्ति ये विष्णुं अनतं अव्ययं - हृत् पद्म मध्ये सततं व्यवस्थितम् ।
समाहितानां सतताभयप्रदं - ते यान्ति सिद्धिं परमाञ्च वैष्णवीम्॥ [38]

क्षीरसागर तरङ्ग-शीकरा - सार-तारकित चारुमूर्तये ।
भोगि भोग शयनीय-शायिने - माधवाय मधुविद्विषे नमः ॥ [39]

यस्य प्रियौ श्रुतिधरौ कविलोकवीरौ - मित्रे द्विजन्मवर पद्म शरावभूताम् ।
तेनाम्बुजाक्श चरणाम्बुज षट्पदेन - राज्ञा कृता कृतिरियं कुलशेखरेण ॥ [40]

**कवितार्किक-सिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥**